(Bib. Ind.) 193

ŚYAINIKA ŚĀSTRA:

OR

A BOOK ON HAWKING

BY

RĀJĀ RUDRADEVA OF KUMAON.

EDITED WITH AN ENGLISH TRANSLATION

BY

MAHĀMAHOPĀDHYĀYA HARAPRASĀDA SHĀSTRI,
M.A., F.A.S.B.

Vice-President, Asiatic Society of Bengal.
Honorary Fellow of the Calcutta University.

CALCUTTA:

PRINTED AT THE BAPTIST MISSION PRESS,

AND PUBLISHED BY THE

ASIATIC SOCIETY, 1, PARK STREET.

1910.

PREFACE.

Literature is generally an index of the life of a nation. Every important act of a national life is faithfully represented in literature. Ancient Indians were very fond of manly sports; and Sanskrit literature is full of the stories of Mṛgayā. It is no wonder, therefore, that hawking should have engaged the attention of Indian writers The work now presented with an English translation to the public, is a book on hawking in Sanskrit by Rudradeva (or Candradeva or Rudracandra Deva as the MS. C calls him), a Rājā of Kūrmācala or Kumaon. The Royal author is systematic in his treatment of the subject. Nowhere does he indulge in theories. His book is thoroughly practical.

The first chapter is devoted to the defence of what Paṇḍitas would call "vices"; and the defence is eminently practical. These should be indulged in for the enjoyment of life. But none should be wholly given up to them. In the second chapter these "vices" are enumerated and defined. The last of the vices is मृगया or hunting. In the third chapter various kinds of hunting are enumerated and defined, the last of which is श्येनपाता or hawking. In the fourth chapter various kinds of hawks are enumerated and described. Their training and their capacity for hunting birds and beasts are also described there in great detail. The fifth chapter is devoted to the kind and quantity of their food, their tending in different seasons, and the treatment of their diseases. In the sixth, various methods of sport with these birds are described; and, in accordance with the time-honoured custom of Indian Paṇḍitas, the enjoyment of the eight different Rasas or emotions can be derived from the sport of hawking. In the seventh are the

after-enjoyments of the sport. The Royal poet is methodical, and he rarely uses a word that is not necessary.

It is difficult to find when Rudradeva flourished. The same Rudradeva of Kumāon has a Smṛti compilation, written in the same style and in the same methodical way. In the *Śyainika Śāstra* he uses many words that are of Turkish or Persian origin. That is no proof of date. For it is known for certain that Indians had connections with Turks from very remote antiquity. In a work written by the Kashmirian poet Dāmodara, the Turkish leather-shoes are described as much in vogue at Benares in the ninth century. In the inscriptions of Govindacandra of Kanauj, the trade in Turkish articles is discouraged by imposing a high tariff on them. The Turks came in and settled in India by hundreds after the eruption of Jengis Khan into their country in the thirteenth century. So the u e of Turkish words is no criterion to fix the date. The absence of any mention of guns and gunpowder shows that the book was written when gunpowder was not known in India, that is, at least three hundred years ago. The fact that this Rājā wrote a *Nibandha* shows that he did not belong to the Hindu but to the Mahommedan period of the Indian History. For the *Nibandhas* began to be written only after the Mahommedans had set their foot in India. Nor could he have written the book in the first century of the Mahommedan conquest. For, we know from the Gayā and Buddha Gayā inscriptions that the kings of Kumāon of that century were Buddhists. The composition of the book, therefore, would range from between the thirteenth to the sixteenth century of the Christian era. This period may be still more contracted by the fact that Rudradeva in his Smṛti work, entitled त्रैवर्णिकधर्मनिर्णय, quotes from Kullūka Bhaṭṭa who flourished about the middle of the fifteenth century. Rudradeva, therefore, must come after him.

I have gratefully to acknowledge the assistance and encouragement which I have always received from Lieutenant-Colonel D. C. Phillott. A good falconer himself, he has written many treatises on hawking, and without his help I could not have translated the book in the technical style in which it now appears.

In the preparation of this edition three MSS. have been used. The first is a MS. acquired for the Asiatic Society of Bengal, but not yet registered. The first and the last leaf of this are missing. This has been called A. It has a peculiar way of correcting mistakes. They are corrected in the next line to that in which they occur, just below where the mistakes are. They are separated from the second line by a rude sort of bracket. This MS. is generally correct. The second MS. B has not yet been permanently acquired. It has the beginning and the end, but some leaves are missing in the middle. The paper is very thin and the writing bad. But it is generally correct. The third MS. called C is No. 8245 of the Government collection. It has the first leaf restored, and it ends abruptly in the middle of the sixth chapter A commentary has also been acquired, No. 8244 of the Society's collection. It is called श्यैनिकशास्त्रटिप्पणिः. It is written in the same hand as B. It is very nearly complete. It deals more with rhetorical discussion than with the technical terms of hawking. Some use has been made of the commentary in the translation.

CALCUTTA, HARAPRASĀD SHĀSTRI.
October 7, 1910.

ERRATA.

Page.	Line.	Incorrect.	Correct.
१	२	तत्	तद्
५	४	०पैश्रून्ये	०पैशुन्ये
५	६	कामजः	कामजाः
६	१३	बर्द्धते	वर्द्धते
७	३	पानात् मत्त०	पानान्मत्त०
८	७	योजयेत्	योजयेद्
९	१२	बध	वध
९	१३	मृगयां ऋषिः	मृगयामृषिः
९	१७	बधः	वधः
१०	१२	तथाकर्त्तव्यता	तथा कर्त्तव्यता
११	४	बधेन	वधेन
१२	७	प्रीतिं अभ्यु०	प्रीतिमभ्यु०
१२	१४	शस्तः	शस्ताः
१३	८	बालिबधे	बालिवधे
१३	१५	पृथक् लीनैः	पृथग् लीनैः
१३	१९	बध्यन्ते	वध्यन्ते
१४	१	बध्यन्ते	वध्यन्ते
१४	१	करवालाद्यैः	करबालाद्यैः
१४	९	बध्यन्ते	वध्यन्ते
१४	९	बध्याः	वध्याः
१४	११	शैनश्चारात्	शनैश्चारात्
१४	१६	बधाय	वधाय
१४	१७	बध्यन्ते	वध्यन्ते
१५	१	बध्यते	वध्यते
१५	११	रौद्रपर्य्यास्तैर्हन्तादन्ति	रौद्रपर्य्यास्यै हन्ता०
१७	७	यथावलम्	यथाबलम्

Page.	Line.	Incorrect.	Correct.
१७	१७	श्रावयेत्	श्रावयेद्
१८	७	द्विशः त्रिशः	द्विशस्त्रिशः
१९	११	०वर्द्धनो०	०वर्द्धना०
२५	९	प्रवर्द्धयेत्	प्रवर्द्धयेत्
२६	११	सामिषम्	सामिषम्
२७	६	०रुजार्त्तानां अन्धकारं	०रुजार्त्तानामन्धकारे
२८	९	०शाखिनां	०शाखिनाम्
२८	१३	चूर्णं अर्क०	चूर्णमर्क०
३२	१०	paragraph	no paragraph
३२	११	no paragraph	paragraph
३२	१७	no paragraph	paragraph
३२	१९	paragraph	no paragraph
३३	७	paragraph	no paragraph
३७	१६	धतस्तु	तुधितस्तु
३७	१७	याङ्गुली	जाङ्गुली
३८	५	ब्रूमः	ब्रूमः
३९	११	प्रोक्षिताः तामम्बा	प्रोक्षितास्तामम्बा
३९	१५	गात्रोत्साहः तुरग०	गात्रोत्साहस्तुरग०

श्यैनिकशास्त्रम् ।

प्रथमः परिच्छेदः ।

त्रैलोक्यश्रेयसे विष्णोर्यन्मित्रं साम्परायिकम् ।
सापत्नमिन्द्रस्य च तत् वन्दे गारुत्मतं महः ॥१॥

कामशास्त्रानभिज्ञानां कामः किन्नु न गोचरः ।
तथापि मुनिभिः शास्त्रं निर्मितं तत्त्वसंविदे ॥२॥

आपामरप्रसिद्धोऽपि तथैव मृगयारसः ।
श्यैनिकज्ञस्य हृदये विशेषान्मुदमृच्छति[1] ॥३॥

इति सद्रसनिष्पत्त्यै श्यैनिकं सप्रयोजनम् ।
विविच्यते मृगव्यायाः समासव्यासयोगतः ॥४॥

नृणां प्राग्दृष्टभोगाश्च विनोदा मनसो मुदे ।
सृष्टा विश्वसृजा कार्त्स्न्यात् के तान् गणितुमीशते ॥५॥

तेषु येऽष्टादश प्रोक्ता व्यसनानीति यान् विदुः ।
तै विना नेन्द्रियफलं त एव रसभूमयः ॥६॥

सेव्यमानाः सुखायालं भवन्ति प्राणिनाञ्च ते ।
यथाकालं यथापोषं विशेषेण महीभृताम् ॥७॥

व्यसनानीति सततं शास्त्रकारैर्विनिन्दिताः ।
श्रूयन्ते चेतिहासाश्च तद्रसभ्रंशसूचकाः ॥८॥

---

१ B C° मुद्रामृच्छताम् ।

यदि सर्व्वात्मनाऽसेव्याः स्मरस्मेराक्षसेक्षणाः ।
पुमांस्तो नरकाम्नाची भवेत् क जनिरौरसी ॥९॥
निषिद्धैव मृगया चेत्तर्हि यागादिसाधनम् ।
क मांसाजिनशृङ्गादि लभ्यते विधिनोदितम् ॥१०॥
अजीर्णाद्यामयध्वंसो दिवास्वप्ननिषेवणात् ।
त्रिवर्गसाधनस्येह जायते वपुषस्तथा ॥११॥
तस्मात् सर्व्वात्मना त्याज्यः सङ्ग एवेति निश्चयः ।
बन्धः सङ्गेन भवतीत्येवं भागवतोक्तयः ॥१२॥
कर्म्ममात्रपरित्यागः स तु मोक्षाय केवलम् ।
जात्युक्तकर्म्माचरणं त्रिवर्गाय किलेष्यते ॥१३॥
स सन्न्यासस्तु सिध्येत मनोवाक्कायकर्म्मभिः ।
कृतेन तेन जायेत ब्रह्म वाचामगोचरम् ॥१४॥
यदि निःश्रेयसे सङ्गजिहासा कर्म्मणाम्भवेत् ।
जन्तोः सुकृतपुञ्जेन तदा सन्न्यासमाचरेत् ॥१५॥
क्षयहेतुश्च भोगोऽपि श्रूयते कर्म्मणां यथा ।
सिषेवे विषयान् ज्ञानी सौभरिर्बन्धमुक्तये ॥१६॥
तथाच गाथाः श्रूयन्ते पितृभिः समुदाहृताः ।
विरक्तस्य रुचेः सम्यक्श्रेयसे हृदयङ्गमाः ॥१७॥
"[१]पूर्व्वकर्म्म कृतं भोगैः क्षीयतेऽहर्निशं तथा ।
सुखदुःखैः स्वकै र्वत्स पुण्यापुण्यात्मकं नृणाम् ॥१८॥

---

१ C omits this verse.

चौणाधिकारो धर्म्मज्ञस्ततः शममवाप्स्यसि।"
तथा भागवतं वाक्यं श्रूयते चार्ज्जुनं प्रति ॥१९॥
"कुरु कर्म्मैव तस्मात्त्वं कर्म्म ज्यायो ह्यकर्म्मणः।
शरीरयात्रापि च ते न प्रसिध्येदकर्म्मणः" ॥१०॥
शास्त्रान्तरेऽपि भूयस्यः श्रूयन्ते तत्त्ववादिनाम्।
गृहाश्रमाचारवतां कर्म्मसम्प्रेरिका गिरः ॥११॥
न्यायागतधनस्तत्त्वज्ञाननिष्ठोऽतिथिप्रियः।
श्राद्धकृत् सत्यवादी च गृहस्थोऽपि विमुच्यते ॥१२॥
इत्यादिवेदवचनैः कर्म्मजाना[1]मपीष्यते।
भोगः फलानां प्राप्तानां स तु सङ्गविवर्ज्जितैः ॥१३॥
श्रूयते जनको राजा प्रजापालनतत्परः।
भुञ्जन् भोगान् मुक्तिपात्रमसक्तिस्तत्र कारणम् ॥१४॥
अयमप्यपवर्गस्य मार्गः प्रकृतिसुन्दरः[2]।
स्वजात्युक्ताभिचरणात् स्वर्गस्तु सुलभो नृणाम् ॥१५॥
स्वर्ग्यं यशस्यमायुष्यं कर्म्म कुर्व्वीत तत्परः।
कुर्व्वन्नेवेह कर्म्माणीत्यादि[3] वेदेऽपि निश्चयः ॥१६॥
सुकृतैः प्राप्यते सम्पत् सा च भोगाय चेष्यते।
स भोगोऽष्टादशविधैर्व्यसनैश्चानुबध्यते ॥१७॥
पृथक् तेभ्यो भोगरूपो न कुत्रापि प्रतीयते।
भक्ष्यस्रक्चन्दनादीयः सोऽपि तादर्थकः स्मृतः ॥१८॥

---

१ A कर्म्मज्ञाना। २ B परमसुन्दरः।
३ B इत्येवं।

अतो वसन्तवर्षर्त्तुचन्दनेन्दूदयादयः।
मुदे कान्तोपगूढ़ानामुद्वेगाय वियोगिनाम् ॥१९॥

धर्म्मद्रुमस्य फलमर्थमुदीरयन्ति
शास्त्रेषु निश्चितधियो हि यथागमेन।
तं दानभोगविधये सुजनो नियुङ्क्ते
सम्यक् तयोः परिणतिः सुषमामुपैति ॥२०॥

इति श्रीकूर्म्माचलाधिपति-रुद्रदेवविरचिते श्यैनिके शास्त्रे
कर्म्मानुषञ्जनः प्रथमः परिच्छेदः।

द्वितीयः परिच्छेदः ।

वाक्पारुष्याद्यभिहितस्तथाष्टादशको गणः ।
हेयाहेयप्रकारेण नामतश्चाथ कथ्यते ॥१॥
वाग्दण्डयोश्च पारुष्ये ईर्ष्यासूया च साहसम् ।
अर्थदूषणपैशून्ये क्रोधजे क्रोध एव च ॥२॥
स्त्रियोऽक्षा मदिरागीतनृत्यवाद्यवृथाटनम् ।
परोक्षनिन्दाहःस्वप्नो मृगया[१] चेति कामजः ॥३॥
अश्लीला कर्कशा चोक्तिर्वाक्पारुष्यमितीर्यते ।
दण्डेषु व्यवहारे च शोभते नान्यदा क्वचित् ॥४॥
दण्डोऽनर्हे महोग्रश्च दण्डपारुष्यमुच्यते ।
प्रतापजननायास्मै सङ्कटे नान्यदा चरेत् ॥५॥
परर्द्धिष्वक्षमा चेर्ष्या सा सपत्ने प्रशस्यते ।
तदुच्छेदाय यतते तयैवोत्तेजितो यतः ॥६॥
दोषारोपो गुणादौ यः सासूयेति निगद्यते ।
विदूषकादिभिः सा तु रहोगोष्ठ्यां प्रशस्यते ॥७॥
क्रियमाणा, तत्प्रपञ्चो नाटकादौ निरीक्ष्यताम् ।
आख्यायिकादिष्वपि च समासव्यासयोगतः ॥८॥
प्राणसन्देहकृत्कार्य्यं कृतं साहसमुच्यते ।
तदापत्सु च शोभायै भवेद्धास्याय चान्यदा ॥९॥
प्रकीर्णता चाग्रहणमपात्रे प्रतिपादनम् ।

१ A B C. अक्षः स्वप्नमृगया चेति ।

मूलच्छेदेन वा दानप्रतिपत्त्यर्थदूषणम्।
तत् प्रयत्नेन चारैस्तु कारयेत् परमण्डले ॥१०॥
सूचनं परदोषाणां पैशुन्यमिति गीयते।
तच्चारमुखतः सर्व्वं श्रोतव्यं स्वधिया पुनः।
निश्चित्य चारैरन्यैश्च प्रतीकारं तदाचरेत् ॥११॥
दण्डादिपातने क्रौर्य्यं क्रोध इत्युच्यते बुधैः।
सदापकारिषु च तं विदध्यान्नेतरेषु च ॥१२॥
सुलक्षणा कलाभिज्ञा दक्षा सौभाग्यसंयुता।
वयोविनयसम्पन्ना सा स्त्री स्त्रीत्युच्यते बुधैः ॥१३॥
साधनं सा त्रिवर्गस्य गृहस्थाश्रमलक्ष्म[1] च।
प्रसूत्युपस्करप्रेक्षामनःप्रह्लादनादिभिः ॥१४॥
एतत् कुमारेणाप्युक्तं पुरागस्त्याय पृच्छते।
"यत्रानुकूल्यं दम्पत्योस्त्रिवर्गस्तत्र वर्द्धते" ॥१५॥
धर्म्मादर्थोऽर्थतः कामः कामः स्त्रीभ्यो न चान्यतः।
तेन धर्म्मद्रुमस्याहो फलं रम्या नितम्बिनी ॥१६॥
अतस्तां सर्व्वभावेन पुमांश्चैवानुरञ्जयेत्।
स्वच्छन्दाचरणं हित्वा कामसंवेदनादिषु ॥१७॥
कामस्थानन्यमनसोर्दम्पत्योर्यः परस्परम्।
आत्मैकवेद्यो नाख्येयः स्पर्शः काम इतीरितः ॥१८॥
गुणाढ्यव्यासवाल्मीकिसूक्तिमुक्तार्णवेषु च।
सम्भोगविप्रलम्भाभ्यां प्रपञ्चस्तस्य विस्तरः ॥१९॥

---

[1] B कर्म्म।

क्रीडा सजीवनिर्जीवा स्तंहपूर्व्वाच उच्यते ।
स चार्थवृद्धौ कामर्द्धौ सुप्रयुक्तः प्रजायते ॥१०॥
यत्पानात् मत्ततामेति तद्वस्तु मदिरोच्यते ।
अचिकित्स्येष्वामयेषु तज्ज्ञैः सापि प्रशस्यते ॥११॥
गेयं यद्रक्तकण्ठस्य तालस्वरसमन्वितं ।
लास्योपयोगि तद्गीतं गीतज्ञास्तद्विजानते ॥१२॥
यथावकाशेन च तच्चतुर्वर्गस्य साधनम् ।
प्रत्यक्षेणार्थकामस्य सिद्धिर्गाने प्रदृश्यते ॥१३॥
धर्म्मापवर्गयोः सिद्धिर्भरतेन यथोदिता ।
याज्ञवल्क्येन मुनिना तथान्यैर्नारदादिभिः ॥१४॥
गीतज्ञो यदि गीतेन नाप्नोति परमं पदम् ।
रुद्रस्यानुचरो भूत्वा तेनैव सह मोदते ॥१५॥
उद्धतं ताण्डवं यच्च लास्यञ्चाभिनयात्मकम् ।
चारौलयसमायुक्तं द्विविधं नृत्यमुच्यते ॥१६॥
चतुर्व्विधं वाद्यमुक्तं[१] तत्ततादिप्रभेदतः ।
प्रयोजनं गीतवच्च विज्ञेयं नृत्यवाद्ययोः ॥१७॥
कार्य्यं विना यदुद्यानननगराद्युपसर्पणम् ।
वृथाटनं तच्छस्तन्तु शरीरालस्यशान्तये ॥१८॥
परोक्षनिन्दा व्यक्तार्था सातिसन्धातुमिष्यते ॥१९॥
सर्व्वर्त्तुषु दिवास्वप्नः सोऽपि व्यक्तार्थ एव हि ।
बालातिसारिक्षीणेषु स चाजीर्णिषु शोभनः ॥३०॥

---

१ C चतुर्विधमिदं वाद्यं।

त एते सप्तदश च मृगया[1]ष्टादशी तथा ।
हेयाहेयाः पुरा प्राह भीष्मो धर्म्मात्मजं यथा ॥२१॥
"व्यसनानि च सर्व्वाणि त्यजेथा भूरिदक्षिण ।
न चैव न प्रयुञ्जीत सङ्गन्तु परिवर्ज्जयेत्" ॥२१॥

इत्थमत्र परिचिन्त्य लाघवं
गौरवञ्च गुणयोगतः पृथक् ।
सङ्गमात्रमपहाय योजयेत्
रञ्जनाय जगतो यथायथम् ॥२२॥

इति श्रीरुद्रदेवविरचिते श्यैनिके शास्त्रे व्यसनहेयाहेयता-
निरूपणो द्वितीयः परिच्छेदः ।

---

१ B एत एते सप्तदशमृगया ।

तृतीयः परिच्छेदः ।

अथेदानीं मृगव्या तु समासव्यासयोगतः ।
एकापि चाष्टधा सैषा बहुधात्र निरूप्यते ॥१॥
आमिषाद्यर्थसंसिद्धौ नैकोपायैः सुखाय च ।
हिंसनं प्राणिमात्रस्य मृगयेति प्रचक्षते ॥२॥
हिंसनं प्राणिनां यत्र तत्र दोषपरम्परा ।
यागीयाः पशवः प्रोक्ता ग्राम्यारण्याश्चतुर्द्दश ॥३॥
एषामप्रोक्षितानाञ्च हिंसा दोषाय जायते ।
अस्मिन्नर्थे पुरा श्लोका यथा द्वैपायनोदिताः ॥४॥
पाण्डुकिन्दमसंवादे मृगहिंसाप्रसङ्गतः ।
"शत्रूणां या वधे वृत्तिः सा मृगाणां वधे स्मृता ॥५॥
राज्ञां, मृग, न मां मोहात् त्वं गर्हयितुमर्हसि" ।
अच्छद्मना मायया वा मृगाणां बध इष्यते ॥६॥
अगस्त्यः सत्रमासीनश्चचार[1] मृगयां ऋषिः ।
आरण्यान् सर्व्वदैवत्यान् पशून् प्रोक्षन् महावने[2] ॥७॥
अगस्त्यप्रोक्षणाद्धिंसा मृगव्यायां न वर्त्तते[3] ।
ग्राम्याणां प्रोक्षणं शस्तं यागादिषु यथाविधि ॥८॥
आरण्यानां ह्यगस्त्यस्य प्रोक्षणाच्छस्यते बधः ।
श्रूयन्ते चेतिहासाश्च राज्ञां तस्मा निषेवने ॥९॥
व्यायामाच्चोपघाताच्च प्रत्युतायासवेदनं ।
यत्र तत्र सुखायेति व्यर्थश्चेत्तत्र कथ्यते ॥१०॥

---

१ B चकार । २ B महामुने । ३ C wrongly प्रवर्त्तते ।

यथा प्रसह्य मानिन्या[1]श्चुम्बनालिङ्गनादिकम् ।
आयाससाध्यमप्यन्तं नाम मुदमश्नुते ॥११॥
प्रहारो नखदन्तादेर्यथैव स्मरसङ्गरे ।
उपघातस्तथैवात्र रसावेशान्न वा रुजे ॥१२॥
इति सिद्धं लक्षणं हि मृगयायाः पुरोदितम्[2] ।
तस्याः किलाष्टभेदानां विवेचनमथोच्यते ॥१३॥

हरमूर्त्तिरिवावस्थाभेदादेकैव कामिनी ।
यथाष्टधा रसायालं तथैव मृगया मता ॥१४॥
आश्वीनान्या सजालान्या काख्यान्या यावशी परा ।
सापेक्षान्या पदप्रेक्षा तथा श्वगणिका परा ॥१५॥
श्येनपाताष्टमी चैताः क्रमेण परिकीर्त्तिताः ।
[3]स्वलक्षणमथैषां हि तथाकर्त्तव्यतोच्यते ॥१६॥

तुरगैः साधनीभूतैर्विद्रवन्तः शरादिभिः ।
वध्यन्ते हि मृगा यस्यां साश्वीना रसशेवधिः ॥१७॥
अवृक्षकर्दमग्रावा नीरन्ध्रा भूः प्रशस्यते ।
कालस्तु शिशिरार्द्धान्तादाज्यैष्ठार्द्धमपीष्यते ॥१८॥
तस्याः सुसेवनान्मेदश्छेदो वपुषि लाघवम् ।
बलाशोपचयो[4] दार्ढ्यमन्तराग्नेश्च पाटवम् ॥१९॥
क्षुत्तृट्शीतातपालस्यजागरादेः सहिष्णुता ।
चललक्ष्यादिनैपुण्यमुत्साहपरिवर्द्धनम् ॥२०॥

---

१ A मानिधन्या । २ C परोदितम् ।
३ B C सलक्षणां । ४ A C बलाशापचयो ।

स्वसत्त्वोद्भावनं ज्ञानं सत्त्वानां चित्तचेष्टिते।
इत्यादिकगुणोत्कर्षो जायते चात्मसम्पदे ॥११॥
तथा धर्म्मार्ज्जनमपि वृकव्याघ्रादिहिंसनात्।
बधेन हरिणादीनां शस्यादीनाञ्च रक्षणात्[1] ॥१२॥
नैककर्मोपयोग्यानामटवीनां निरीक्षणात्।
वित्रासनाच्च चौराणां तथाटविकरञ्जनात् ॥१३॥
तथार्थोपार्ज्जनं मत्तहस्तिगण्डानुबन्धनात्।
विषाणाजिनकस्तूरिमणिपक्षाद्युपार्ज्जनात् ॥१४॥
वराहलाविकादीनां[2] सन्मांसाभ्यवहारतः।
उद्रिक्तसत्त्वसम्पत्त्या कामोद्रेकोऽपि[3] पुष्कलः ॥१५॥
रसोऽभिमानोऽहङ्कारः कामसर्व्वस्वमुच्यते।
अतो मृगव्याश्रान्तस्य चन्दनाद्यनुलेपनम् ॥१६॥
गात्रसंवाहनं हस्तपल्लवैश्च मृगीदृशाम्।
पानकं पञ्चसारादि तालवृन्तानिला मुहुः ॥१७॥
मनसोऽप्यभिमानेन यथा सम्बन्धमृच्छति।
अन्यदा न तथा येन तेन कामैकवेदनम् ॥१८॥
स्त्रीमृगव्याभिदा कापि रसपुष्टौ न दृश्यते।
शास्त्रकारैः कियैतावान् सूक्ष्मभेदस्तु दर्शितः ॥१९॥
आभ्यासिकी सम्प्रयोगे प्रीतिश्चानुत्तमा रतौ।
विभावाश्चानुभावाश्च रसाधिक्यात्तयोः समाः ॥२०॥

१ C वर्द्धनात्। २ A B C लावक।
३ B कामोत्कर्षोऽपि।

संयोगविप्रयोगाभ्यां विलोक्यन्ते यथायथम् ।
तेषां स्त्रीविषये व्यासो नाट्यालङ्कारनिर्मितौ ॥२१॥
कामशास्त्रादिषु महान् दृश्यते तेन नोच्यते ।
मृगयायास्तु संक्षेपात् परिज्ञानाय कथ्यते ॥२२॥
मोक्तुर्दूराच्छकुन्तादेर्ग्रहः श्येनादिभिः कृतः ।
धन्विनश्च हठाल्लक्ष्ये शरसिद्धिश्चलाचले ॥२३॥
व्यञ्जयत्युत्तमां प्रीतिं अश्रुरोमाञ्चगद्गदैः ।
विच्युतिश्चापि तस्यैव वियोगेनापदिश्यते ॥२४॥
वितर्कस्मृतिवैवर्ण्यविलापादिकरी यतः ।
इत्याद्यूह्यमतः साम्यं मृगयायास्तथा स्त्रियः ।
तेनैषापि त्रिवर्गस्य साधनाय प्रशस्यते ॥२५॥
सम्भूय सावकाशेन प्रसार्य्याखिलसम्मुखम् ।
बलं मृगाभिसारेण सानायासेन सिध्यति ॥२६॥
खड्गाभिसरणे शस्ताः सञ्चषा एव सादिनः ॥२७॥
वश्यास्तुरङ्गाः शस्यन्ते शिक्षिता ये गतागते ।
त्वरया पृष्ठतो वेध्यः क्षुद्रशक्त्या तु सादिना ॥२८॥
परावृत्तो यदि भवेत्तदास्य पुरयायिना ।
विश्रब्धात्तु निजाश्वस्य सादिना भाव्यमञ्चषा ॥२९॥
तस्याभिसारे चान्येन वेध्यो भवति पृष्ठतः ।
अथवा पार्श्वतो वाणैर्वेध्यः श्रेष्ठधनुर्द्धरैः ॥४०॥
दृप्तं मृगेन्द्रमपि च तरलाश्वैस्तु धन्विनः ।
लक्ष्यालक्ष्येण लक्ष्येण मार्ज्जारमिव निघ्नते ॥४१॥

सा सजाला कूटवृत्त्या यस्यां निघ्नन्ति वै मृगान् ।
मत्स्यमण्डूकगोद्रसूकरीनां बन्धनञ्चापि कुर्व्वते ॥४२॥
नरास्तस्याः साधनानामानन्त्यमुपलक्ष्यते ।
निषादप्रायनीचेषु स्थितिस्तस्या विलोक्यते ॥४३॥
गजबन्धादिमौकर्य्यसिद्धये सातिरिच्यते ।
कारणीया नृपैः सा तु महोदयकरी यतः ॥४४॥
छद्माचरणमप्यत्र न दोषायानुबध्यते ।
अस्मिन्नर्थे वालिबधे यथा वाल्मीकिनोदना[१] ॥४५॥
"वागुराभिश्च कूटैश्च पाशैश्च विविधैर्नराः ।
प्रतिच्छन्ना अदृश्याश्च[२] गृह्णन्ति बहवोऽद्भुतम् ।
विध्यन्त्यभिमुखांश्चापि मृगयाधर्म्मकोविदाः" ॥४६॥
कुरङ्गांश्च कुरङ्गाश्च पक्षिणश्चापि पक्षिणः ।
बध्नन्ति शिक्षायोगेन सजालान्तर्गतैव सा ॥४७॥
काल्या सङ्काल्य बहुभिः पृष्ठतोऽन्यैः पुरःस्थितैः ।
साध्यते या पृथक्कुलीनैश्चतुर्धा सा तु भिद्यते ॥४८॥
तारोच्चारैः काल्यमानाः पुरोवातं द्विभिस्त्रिभिः ।
त्रिकर्णिमोच्चैर्हन्यन्ते एणाः सा बहुकर्णिका ॥४९॥
पृष्ठतो निविडीभूतैः काल्यन्ते यत्र वै मृगाः ।
बध्यन्ते पादपच्छन्नैर्यत्र सा मूललग्निका ॥५०॥
सुदूराद् वर्त्तुलीभूय क्रमात् सङ्कोचमागतैः ।
एकत्र प्रतिसंरुद्धा नैकजात्युद्भवा मृगाः ॥५१॥

---

१ A B ०नोदनात् । २ B सदृश्यांश्च ।

बध्यन्ते करवालाद्यैर्बहुभिर्यत्र नैकधा ।
महाकाव्येति सा प्रोक्ता सिध्यते सा नृपादिभिः ॥५२॥
अपरा गजकाव्येति साध्यते साश्ववादिभिः ।
ग्रीष्मर्त्तावेव विरलीभूतवाय्वुपरोधनात् ॥५३॥
चतुर्व्विधायाः काव्यायाः साधने कुशला जनाः ।
युज्यन्ते काननेमोचे शराणाञ्चान्यथा नृणाम् ।
वृथायासो भवेद्ध्वंसः स्तौर्य्येष्वेवानुदृश्यते ॥५४॥
निर्यातयवशस्यादिस्पन्दनामात्रसूचिताः ।
बध्यन्ते यत्र वै बध्या यावशी सा प्रकीर्त्तिता ॥५५॥
द्वित्रैरेवाश्ववारैश्च शरमोचविशारदैः ।
सा सिध्यति शनैस्सारात् शस्य[१]स्पन्दोपलक्षणात् ॥५६॥
नात्यायासकरी सा तु प्रमोदायोपजायते ॥५७॥
मृगाद्यपेक्षामालम्ब्य लीनो यत्रैक एव वा ।
धन्वी विध्यति दिग्भेन सा सापेक्षा स्मृता बुधैः ॥५८॥
विभीतकादौ क्षेत्रे वा निपाने सा तु सिध्यति[२] ।
गोशवादिषु सिंहादेर्बधाय सुखसिद्धिदा ॥५९॥
पदमार्गानुसारेण बध्यन्ते यत्र वै मृगाः ।
पदप्रेक्षा च सा प्रोक्ता द्विधा सापि प्रयुज्यते ॥६०॥
[३]कुक्कुरैः परितोऽन्विष्य चिरमायास्य कर्कशम् ।

---

१ C शस्य । २ C सिद्धिदा ।

३ C विहाय सारमेयैस्तु धन्विनः पदगाः स्वयं ।
घ्नन्ति श्रान्तान् मृगान् यत्र सा पदप्रेक्षिका तु सा ।

बध्यते हि मृगो यस्यां स्वपदप्रेचिका हि सा ॥६१॥
यत्र धन्वी प्रयत्नेन स्वयमन्विष्य कौशलात् ।
सुप्तं सुप्तोत्थितं वापि हन्ति सा पूर्व्वशब्दिता ॥६२॥
ते च द्वे सैकतप्राये सानूपे वाथ यत्नतः ।
वर्षर्त्तावतिसिध्येते चान्यदातिश्रमात् पुनः ॥६३॥
अपरादिस्थले यस्यां लच्चीकृत्योपवाहिताः ।
गच्छन्ति शशकादींश्च श्वानः श्वगणिका स्मृता ॥६४॥
शुनां मुखपरिचेपः सिद्धसिद्धौ शशस्रुतौ ।
पतनोत्पतनाभ्यां द्वे हास्यपुष्टिविधायिके ॥६५॥
तेषाञ्च घुर्घुरोद्दामराविणि प्रतिधावताम् ।
काले तद्रौद्रपर्य्याप्ते दन्तादन्ति नखानखि ॥६६॥
[1]द्विशस्त्रिशः सावकाशाद्रज्जुमोचविशारदैः ।
लच्यमुद्दिश्य च शुनां मोकस्तत्सिद्धिकारकः ॥६७॥
तस्यां शराणां सहसा मोचो नान्यत्र शस्यते ।
बाधमानमपास्यैकं कोलं कौलेयसिद्धये ॥६८॥
दण्डापि[2] सा त्वर्थयुक्ता[3] प्रयोक्तव्या शशादिषु ।
एवं सापि प्रमोदानामास्पदं परिकीर्त्त्यते ॥६९॥
[4]अस्या एव भिदा कापि कृष्णसारे हरौ हि यः ।
मोकोऽतिरसत्त्वेन रज्ज्वा मोकोऽपि स स्मृतः ॥७०॥
यस्यां तज्ज्ञैर्द्विधा मुक्ताः पतत्रिषु पतन्ति च ।

---

१ C puts this verse after the next. २ B दांडा ।
३ A B ॰युक्तया । ४ C omits this verse.

श्येनाः, मातीव रसभूः श्येनपातेति कथ्यते ॥७१॥

श्येनपाता मृगव्येति स्वैरं वान्यस्य वा भवेत् ।
स्वैरमारण्यकानाञ्चेत् मृगव्येति निरर्थकम् ॥७२॥

मृगान् शशादा गृह्णन्तीत्येवं यदि सदर्थकम्[१] ।
तदा सिंहादिषु पुनः कथं नैतत्प्रयुज्यते ॥७३॥

यत्रानेकार्थससक्तत् मृग्यन्ते प्राणिनः पराः ।
सा मृगव्येति निर्द्दिष्टा सा तिरश्चां न विद्यते ॥७४॥

ते तु स्वोदरपर्य्याप्तिमात्रमांसाय केवलम् ।
हिंसन्ति[२] न तु चैतेषां अर्थोऽन्यत्रानुबध्यते ॥७५॥

न केवलं मृगव्याया ह्यर्थो मांसार्थमात्रकः ।
यतो मुक्ताजिनादीनां कस्तूर्य्यादेः समुद्भवः ॥७६॥

दृश्यन्ते हस्तिबन्धाश्च तेन नानार्थसिद्धये ।
अन्विष्यते प्राणिजातं मृगयेत्युच्यते ततः ॥७७॥

अतो नृभिः प्रयुक्तानां तेषां पातोऽत्र कथ्यते ।
तेनाष्टमी मृगव्येषा श्येनपाता निरूपिता ॥७८॥

एतस्या विशदतया किलाष्ट भेदा
निर्द्दिष्टाः पुनरपरे ह्यवान्तरा ये ।
ते सर्व्वे रसजननाय नैकरूपाः
कल्प्यन्ते विहितविधानसम्प्रयोगात् ॥७९॥

इति श्रीरुद्रदेवविरचिते श्यैनिके शास्त्रे मृगयाविवेचनस्तृतीयः परिच्छेदः ।

---

१ B omits this line. २ भिन्नन्ति ।

चतुर्थः परिच्छेदः ।

मोकाद्याचारसम्पन्ना श्येनलक्षणलक्षिता ।
विश्रम्भणाद्युपायैश्च विहिता सा निगद्यते ॥१॥

हस्तमुष्टिप्रभेदेन मोको द्विविध उच्यते ।
यत्राङ्गुलीभिः सर्व्वाभिः [1]श्येनपत्याग्रपीडनम् ॥२॥
विधाय क्रियते मोको हस्तमोकः स उच्यते ।
कुह्यादिष्वयमेवोक्तो वासादिष्वपि शस्यते ॥३॥
वस्त्रान्तरितमावेश्य तलोपरि यथाबलम् ।
असङ्गवत्परीक्षेपो मुष्टिमोकः प्रकीर्त्तितः ॥४॥
असक्तं लघु मोक्षासं गतानुगतमञ्जसा ।
प्रशस्यते द्विधा मोको दूरे दूरे यथायथम् ॥५॥

तेषां विश्रम्भणं पूर्व्वं यथावदिह कथ्यते ।
आदौ विमुद्रयेन्नेत्रे सीवनेन विचक्षणः ॥६॥
यथा न मुखमीक्षेत यथा वा[2] प्रतिशीर्षकैः ।
शब्दश्च श्रावयेन्नैव यावद्दिवसपञ्चकम् ॥७॥
ततः प्रतिनिशं किञ्चित् सालोके दीपिकादिभिः ।
नेत्रे निर्मुच्य[3] पानीयैः क्षालयेत् सुखशीतलैः ॥८॥
किञ्चित् किञ्चित् परिचयं कारयेत् श्रावयेत् वचः ।
एवं क्रमेण हस्तादिस्पर्शैर्वाक्योपलालनैः ॥९॥
विभक्तकाले पानीयमांसदानेन सान्त्वनैः ।
छायातपोपशमनैः क्रमात्तेचोपमोचनैः ॥१०॥

---

१ A श्येनवत्• । २ A, B तथा वा । ३ A C निर्मृज्य ।

6067

ज्ञात्वा रक्तापरक्तत्वं श्येनानां विचेष्टितैः।
नेत्रे निमील्य तिष्ठन्ति चैकपादेन वै यदा ॥११॥
चञ्च्वा कण्डूयनञ्चैव पक्षपाल्योर्विधूननम्।
आस्यावलोकने सौम्यां दृष्टिं सञ्चारयन्ति च ॥१२॥
तदा रक्तास्तु विज्ञेया विरक्तास्त्वन्यथा तु ते।
रक्तान् ज्ञात्वा रज्जुयुक्तानाह्वयेदामिषादिभिः ॥१३॥
क्रमेण वर्द्धयेद्भूमिमाह्वयेच्च दिशः क्षिपः।
यदाह्वाने नो विलम्बं कुर्युस्तिर्य्यङ्‌ वा गतिम् ॥१४॥
न मांसादेस्तथा दृष्टिं तदा रज्वा विनाह्वयेत्।
ततो वृक्षाद्युपरि च प्रक्षिप्याह्वाययेत् क्रमात् ॥१५॥
कलविङ्ककपोतादिपतत्रिग्रहणं पुनः।
कारयेत् पूर्व्वसंस्कारस्मारणाय यथायथम् ॥१६॥
क्रमेणानेन ये न स्युर्वश्यास्ताननतिजागरैः।
अत्यन्तकरसंयोगैः कर्षणैश्चानयेद्वशम् ॥१७॥
तेषां जात्यनुरूपा च रञ्जनाय क्रिया मता।
अतोऽनुवक्ष्ये श्येनानां पृथग्जातिविवेचनम् ॥१८॥
कृष्णाक्षा पाटलाक्षा च जाती द्वे प्रस्फुटान्तरे।
तयोश्चावान्तरा भेदा लक्ष्यन्तेऽन्येऽपि भूरिशः ॥१९॥
तेषां नामानि कथ्यन्ते जातानां जातिमुख्ययोः।
कुही-शशाद-चरक-बहरी-लगरास्तथा ॥२०॥
तथान्या पक्षकलिका तथा तुरमुती परा।
पुंव्यक्तयश्च तत्सञ्ज्ञाः कृष्णाक्षजातिजो गणः ॥२१॥

एषोऽतिजागरैः साध्यः सपानीयामिषाशनः ।
कार्य्यो मुखे शिलाक्षेपस्तथा हस्तादिदंशने ॥२२॥
विश्रम्भस्याक्षुधस्यास्य क्षिप्रमेव प्रजायते ।
आभ्यन्तरस्तु कृच्छ्रेण तस्माद् युक्त्या वशं नयेत् ॥२३॥
आक्रान्तं पक्षबन्धेन वाससा वा प्रकल्पयेत् ।
आगते देयमशनं यथा नाशो विहन्यते ॥२४॥
वाग्दण्डैश्चार्थदण्डैश्च किञ्चिदाश्वासनैस्तथा ।
स्थाप्यन्ते स्ववशे दुष्टा यथैवेष[1] गणस्तथा ॥२५॥
अतिपुष्टस्तु[2] विकृतिमशक्तिमतिकर्षितः ।
सम्पद्यते यथा नीचस्तथैवैष गणः स्मृतः ॥२६॥
प्रत्याशावर्द्धनोपायै र्दानैः कर्म्मानुरूपतः ।
रञ्जिता रञ्जनाचार्यं भृत्या इव भवन्ति ते ॥२७॥
दूराक्रान्ते दूरपाते[3] स्थूललक्ष्यविनिग्रहे ।
प्रशस्त एष हि गणो द्वितीयः कथ्यतेऽधुना ॥२८॥
पक्षं वाजश्छदं इति पर्य्यायकथनोक्तयः ।
भवन्ति तेन सामान्यं वाजवत्त्वं पतत्त्रिणाम् ॥२९॥
यथाश्वत्थाम्नि कर्णे च भीष्मे पार्थे च रुक्मिणि ।
सामान्ये सव्यसाचित्वे वैशिष्ट्यादर्ज्जुनेऽभिधा ॥३०॥
तथैव वाजवत्त्वेऽपि सामान्ये सर्व्वपक्षिणाम् ।
श्येने पक्षीति वाजीति शब्दो वैशिष्ट्यसूचकः ॥३१॥
वाजा वाशा वेसराश्च मिश्राश्च चतुर्व्विधाः ।

---

१ A B वेह । २ C अतिदुष्टः । ३ C दूरयाने ।

जूराखेटा धूतिटुनास्तथा पुंच्छयस्तमी ॥ ३२ ॥
उभयोर्गणयोरेषां स्त्रीणां प्राधान्यमूर्ज्जितम् ।
संस्थाने साहसे मूल्ये पक्षपातादिसौष्ठवे ॥
वाजाद्यास्तु प्रधानत्वात् पुंलिङ्गे व्यपदेशिताः ॥ ३३ ॥

वाजिनः पञ्चधा तेषां पृथक्लक्षणमुच्यते ।
कृष्णाकृतिर्बलाकाक्षः श्वेतकृष्णकपर्द्दिकः ॥ ३४ ॥
भवत्यङ्गे तथोर्व्वोस्तु सुखसाध्यः प्रकीर्त्तितः ।
यस्तु चक्रवाकसंस्थानस्त्वक्राङ्गः स च कीर्त्तितः ॥ ३५ ॥
प्रलम्बः कृष्णसंस्थानः कङ्काभः कालकः स्मृतः ।
चिरादिश्रममभ्येति सुरक्तोऽपि विरज्यते ॥ ३६ ॥
यः सर्व्वाङ्गे हिमप्रख्यो हंसवाजः स कथ्यते ।
स यत्र पूजितस्तिष्ठेत् कल्याणं तत्र जायते ॥ ३७ ॥
तं प्रयत्नेन रक्षेत्तु नाखेड़ादिषु[१] योजयेत् ।
तस्य स्पर्शेन नश्यन्ति ज्वरास्वातुर्थिकादयः ॥ ३८ ॥
यस्याश्वत्थदलप्रख्या लेखा पुच्छच्छदादिषु[२] ।
जायते वाजराजोऽसौ महारावणसंज्ञकः ॥ ३९ ॥
स महापुण्यनिचयैः प्राप्यते कौतुकास्पदम् ।
रावणात् पश्चिमङ्गानां महारावण उच्यते ॥ ४० ॥

श्यौरङ्गना धावनास्तु प्रतिष्ठानास्तथैव च ।
शिकाराश्चेति वाशानां चतुर्धा जातिरुच्यते ॥ ४१ ॥
श्यौरङ्गना बहुविधा भवन्त्युच्चावचा अपि ।
विक्रमे साहसे चैव वर्णैरपि पृथग्विधाः ॥ ४२ ॥

---

१ C आखेटा० ।　　२ C पक्षच्छटा०, A पुच्छच्छटा० ।

धावनाः सूक्ष्मकायाश्च सुकुमारा जवाधिकाः।
पत्रप्रायाः प्रतिष्ठाना मन्दा वेगे च साहसे ॥४३॥
अरोगा बद्धपिण्डाश्च वाजदेशसमुद्भवाः।
श्वेताभा गैरिकाभाश्च कृष्णाभा वर्णतः स्मृताः ॥४४॥
सुशीला जवना स्निग्धाः शिकाराश्चण्डसाहसाः।
श्चोतन्त इव पीयूषं दृशोः संस्थानसौष्ठवैः ॥४५॥
प्राप्यन्ते तेऽतिसुकृतैः शिक्षासंस्कारशालिनः।
नानातिजागरायासैः क्लेशयेन्नाक्षयेन्मुहुः ॥४६॥
पुष्टानेव मृगव्यायां योजयेन्मनसो मुदे।
वेसरास्त्रिविधास्तेषां पृथङ्नामाभिधीयते ॥४७॥
स्थूलोऽधमो माणिकस्तु चूलिकाङ्कस्तु मध्यमः।
शुद्धस्तु वासाप्रतिमः पृच्छाधिक्येऽपि साहसे ॥४८॥
अनेकदेशजन्मानस्तेन देशस्वभावतः।
नानासंस्थानचेष्टाभिः शिचाना नैकधा स्मृताः ॥४९॥
पुंव्यक्तयोऽपि चैतेषां लक्षणैरुपलक्षिताः।
भवन्ति ते च विस्तारभयान्नात्र प्रदर्शिताः ॥५०॥
शीर्षं फणिफणाकारं शस्तं ग्रीवा तथोन्नता।
पक्षती चायते वक्षो विस्तीर्णं सर्व्वपक्षिणाम् ॥५१॥
ह्रस्वे च नलिके तद्वद्वृत्तपीने सुबन्धने।
आयताङ्गुलिसुश्लिष्टसन्धिबन्धौ करौ मतौ ॥५२॥
उदग्रनखरौ चैषामासनं[1] स्वस्तिकाकृति।
एतानि लक्षणान्येषां सामान्यानि विजानते ॥५३॥

---

१ A चांगनम्।

नासा मधुरवाक् धन्यो वाजी मूकोऽतिशोभनः ।
कुष्ठी यस्याः कण्ठिका हि कर्णान्ता रजताकृतिः ॥५४॥

पचमत्कारसम्पृष्टा लालनैश्चानुरञ्जिताः ।
भवन्ति वाञ्छितार्थाय श्येनाः सुसचिवा इव ॥५५॥

पक्षी विनेतुरसमं बुद्धिकौशलवैभवम् ।
राज्यतन्त्रविधानज्ञो वा[1] जानाति न चेतरः ॥५६॥

यत्र लब्धोपशमनमलब्धार्थोपचिन्तनम् ।
दुष्टानां कर्षणं युक्त्या विनीतानाञ्च पोषणम् ॥५७॥

उत्साहवर्द्धनं कामपूरणैः कृतकर्मणाम् ।
रञ्जनं रक्षणं शश्वत् रक्षारक्षपरीक्षणम् ॥५८॥

विश्वासनमविश्वासो नेत्रचेष्टानिरूपणम् ।
साध्यसाधनयोर्ज्ञानं शक्याशक्यविवेचनम् ॥५९॥

ज्ञात्वा नियोजनं योग्ये तथायोग्यान्निवर्त्तनम् ।
इत्याद्यूह्या गुणा ये च राजधर्मे प्रदर्शिताः ॥६०॥

तत्र ते श्यैनिके शास्त्रे विचीयन्ते मनीषिभिः ।
यथावकाशं हि रसा नाट्यादौ ये विनिर्मिताः ॥६१॥

इत्याद्यनेकरसभावनया गभीर-
मापामराद्दिसुखसेव्यतया सुबोधम् ।
संक्षिप्तयुक्तिरचितं परिशीलयन्तु
ते श्यैनिकन्तु मृगयाऽभिमता हि येषाम् ॥६२॥

इति श्रीरुद्रदेवविरचिते श्यैनिके शास्त्रे श्येनानां विवेचनं
परिच्छेदः चतुर्थः ॥

---

[1] A B वि.।

पञ्चमः परिच्छेदः ।

तेषामाहारमात्रायाः परिमाणमथोच्यते ।
कालचर्य्या तथा रोगपरीक्षानिग्रहावपि ॥ १ ॥
पञ्चविंशतिटङ्कैस्तु मात्रा शुद्धामिषस्य या ।
कुहीचरकवाजानां वहरीणाञ्च सा भवेत् ॥ २ ॥
शशादा नाल्पमात्रार्हा लङ्घनेऽपि तथाक्षमाः ।
जातिमात्रेण निर्द्दिष्टास्तेषां क्रीड़ा तु नोदिता ॥ ३ ॥
तैः पञ्चहीनां तासान्तु पुंव्यक्तीनां प्रयोजयेत् ।
पत्रकाकलिकायास्तु पञ्चहीना ततो भवेत् ॥ ४ ॥
ततो द्विहीना वासानां द्विहीनां पुनरादिशेत् ।
शुद्धानां वेसराणान्तु चूलाङ्कानां पुरोदिताः ॥ ५ ॥
तावन्मात्रा सिचानानां यथासात्म्येन कल्पिता ॥ ६ ॥
तथा तुरुमुतीनान्तु नवटङ्कैः प्रकल्पिता ।
चेटाटोनाधूतिकानामेकद्वित्रिक्रमात् कशाम् ॥ ७ ॥
प्रकल्पयेदिमां मात्रां दिवारम्भेषु योजयेत् ।
यथा वेतनभक्तस्य यथायोग्येव कल्पना ॥ ८ ॥
शस्यते कालपातोऽपि तन्मत्तोभाय कल्पते ।
तथैषां कालपातोऽपि नाहारेषु प्रशस्यते ॥ ९ ॥
वैषम्यमपि मात्राया वैगुण्यमुपपादयेत् ।
मात्रैषा हि मृगव्यायां नियुक्तानां प्रकीर्त्तिता ॥ १० ॥
पक्षमोक्षाय ज्यैष्ठादावन्यां मात्रां प्रकल्पयेत् ।
ग्रीष्मे प्रचण्डमार्त्तण्डतापसन्तापिता दिशः ॥ ११ ॥

न भान्ति तरवश्चैव शीर्णपर्णैरमाश्रयाः।
झञ्झानिला धूलिजालैराविला वान्ति सर्व्वतः॥१२॥
पयांसि क्वथितानीव स्रोतस्विन्यः स्रवन्ति च।
प्रतप्तरेणुदुष्पर्शा रसा तेनेह जन्तवः।
निर्वैरा विगतोत्साहा लक्ष्यन्ते ज्वरिता इव॥१३॥
पतत्रिणस्तारतारं रुवन्ति करुणस्वरैः।
विशेषेण स्रवद्वारिधौतामलशिलाचिताः॥१४॥
भिन्नेन्द्रनीलसङ्काशसूक्ष्मशष्पसमाचिताः।
स्रवत्सरलनिर्याससुरभीकृतमारुताः॥१५॥
उपत्यका हिमगिरेर्येषां परिचयं गताः।
तेषां दावाग्निसङ्काशो ग्रीष्मो भवति दुःसहः॥१६॥
अतस्तापोपशमनान् उपचारान् प्रयोजयेत्।
तेषां प्रासादशिखरे सुधाधवलितोदरे॥१७॥
यन्त्रनिर्मुक्तपर्य्यन्तपानीयासारशीतले।
जनैर्व्यजनहस्तैश्च दूरतो जनितानिले॥१८॥
विविक्ते बन्धनं कार्य्यं जालसंरुद्धमक्षिके[1]।
अथवोद्यानसदेश्यां रचितायां सुरुचिभिः॥१९॥
[2]सरत्कुल्याम्बुशीतायां निविडोच्छ्रितभूरुहैः।
चण्डांशुकरसञ्चाररहितायामनारतम्॥२०॥
[3]अथोशीरपरिन्यस्तपानीयैसुरभीकृते।

१ C °मक्षके। २ C रसत्° । ३ A B °वति।

परितो वापितोद्भूतयवाङ्कुरविराजिते ॥२१॥
निर्दंशमशके रम्ये भूगृहे बन्ध इष्यते।
स्थानं विलोचनानन्दजननं घ्राणतर्पणम् ॥२२॥
समाहृतप्रचारन्तु सावकाशं प्रकल्पयेत्।
नैकत्र बहवः स्थाप्याः दिवाः स्थाप्याः पृथक् पृथक् ॥२३॥
न च [1]तेभ्यः सुशीताम्बु वारंवारं प्रदर्शयेत्।
वाजादिकलविङ्कादेर्मांसं नातिचिरस्थितम् ॥२४॥
लघु रुच्यं[2] प्रदातव्यं यथा परिणमेत्तथा।
पुष्ट्यै प्रवर्द्धयेदेषां मात्रामथ शनैःशनैः ॥२५॥
स्नानार्थं वारिपूर्णाश्च स्थापयेत् कुण्डिकाः पुरः।
भुक्तं यद्युद्गिरेयुस्ते मांसमेषां तदौषधम् ॥२६॥
मक्षिया नवनीतेन मेथिकाचूर्णमिष्यते।
भुक्तं परिणमेन्नेषां यदि देयं तदामिषम् ॥२७॥
सद्योहृतश्च[3] मद्याम्बुसिक्तं चन्द्राङ्कसंयुतम्।
प्रदेयमथवा वह्निचूर्णं तदुपशान्तये ॥२८॥
किंवा भङ्गारसोन्मिश्रं पश्चात् तप्ताम्बु पाययेत्।
युक्त्या यथा नोद्विजेरन् युक्तिः सर्व्वत्र साधिका।
कार्श्यं यदि भजेयुस्ते तदा स्त्रीस्तन्यसंयुतम् ॥२९॥
प्रदेयं नवनीतेन धेन्वा वा मांसमिष्यते।
चुद्बोधाय लवङ्गेन नरमूत्रेण वा पुनः ॥३०॥

---

[1] C तत्र। [2] C भव्यं। [3] C °हृतश्च।

एवं क्रमेण चुह्णद्धिं विधाय परिवर्ह्वयेत्।
मांसाम्बर्द्धनैर्नित्यमुपचारैः सुशीतलैः॥३१॥

अथाम्बुदक्षतध्वाने विद्युद्द्योतदीपिते।
मालतीजनितामोदप्रमोदे सर्व्वदेहिनाम्॥३२॥
दर्द्दुराराववित्रते शिखण्डिकृततााण्डवे।
कदम्बामोदपिशुने श्वसने वाति सर्व्वतः॥३३॥
सर्व्वत्रासारमञ्जारकलुषे सरिदम्बुनि।
झिल्लीझङ्कारवाचाले काले प्रावृषि चागते॥३४॥
तथैवोपचरेत्तांस्तु यथा पुष्टाः स्वपत्रकान्[1]।
त्यक्त्वा नवान् प्रपद्येरन् सर्पास्त्वचमिव द्रुतम्॥३५॥
यदि कालात्ययं कुर्य्युः पत्रमोचाय मामिषम्।
शरटामिषमप्येके पत्रमोचाय जानते॥३६॥
गदूपं गोमहिष्यादेर्द्ददते स्वच्छजातयः।
नैर्घृण्याद्वेगमान्द्यादिकरणान्नैव शस्यते॥३७॥

क्षमयो यदि पत्राणि च्यावयन्ति तदौषधम्।
विडङ्गवह्निकस्तूरीसमभागैः प्रदापयेत्॥३८॥
द्विरत्तिमात्रमथवा सैन्धवं स्थूलपक्षिणाम्।
लघूनां रत्तिकार्द्धन्तु समांसं दिवसत्रयम्॥३९॥

तज्ज्ञैः सुशिक्षिताः श्येना भवन्त्यानन्ददायिनः।
अतः सुखविघातार्थं नृणां प्रागदृष्टदोषतः॥४०॥

---

१ C स्वपूच्छकान्।

तेषामपि भवन्तीह रोगास्तस्माच्च शान्तये।
तेषाञ्चोद्दिशतो वच्च्येऽनिग्रहायौषधक्रमम् ॥४१॥
चतुर्धा श्वासवैषम्यवृत्तिः शाखेति कथ्यते।
अभिघातसमुत्थैका श्लेष्मजान्या च पित्तजा ॥४२॥
चैणजान्या शोषितेति कृच्छ्रसाध्या तु सा स्मृता।
एषां शाखारुजार्त्तानां अन्धकारेऽतिनिर्ज्जने ॥४३॥
दृश्यते स्थानमल्पाल्पमामिषं साम्बु दापयेत्।
घातजे वोलयुग्मांसं देयं गात्रेऽपि सव्यथे ॥४४॥
हरिद्रां लेपयेद् युक्त्या सेकः पर्य्युषिताम्बुना।
श्लेष्मजे मारिचं चूर्णं नस्ये प्राक् संप्रयोजयेत् ॥४५॥
शिग्रुत्वक्चूर्णयुङ्मांसं देयं तन्नाम्बु पाययेत्।
कस्तूरिकापि देया तु तदुपद्रवशान्तये ॥४६॥
पित्तजे घनसारेण लवङ्गोशीरचन्दनैः।
समांसैर्गुटिका देया मांसात् प्रागेव युक्तितः ॥४७॥
पश्चान्मांसं वर्त्तिकादेर्देयमल्पं सवारि च।
चैणजा दुर्द्धरा प्रोक्ता तथापि समुदीर्य्यते ॥४८॥
क्रियाः किलायुषः शेषे फलन्त्यपि सुयोजिताः।
शस्यते कलविङ्कादेर्नरास्रक्भिक्तमामिषम् ॥४९॥
अथवा पूजनायास्तत्कालीनं सम्प्रयोजयेत्।
किटैरपि प्रयोक्तव्यमल्पमल्पं यथाबलम् ॥५०॥
धेन्वाश्च नवनीतेन पक्षिणां मिश्रमामिषम्।
दद्यात्तन्नाम्बु युक्त्या च ततस्तदनुपाययेत् ॥५१॥

कर्पूरसंयुतं वारि काले काले प्रदापयेत् ।
अथैषां शाखिनां शस्ता सिमायी या प्रकीर्त्त्यते ॥५२॥
स्थूलानां श्यामनेत्राणां रक्तिकात्रितयं भवेत् ।
मात्रान्तेषान्तु सूक्ष्माणां तदर्द्धमुपकल्पयेत् ॥५३॥
स्थूलानां पाटलाक्षाणां मात्रा द्वे कृष्णले स्मृता ।
सूक्ष्माणां कृष्णलैका तु मात्रा भवति चौषधे ॥५४॥
स्तन्यं भृङ्गारसोन्मिश्रं मांसेन सह योजयेत् ।
अक्षयेत्सात्रिणी नित्यं दन्तचर्व्वितजीरकैः ॥५५॥
त्रिसप्तकदिनान्येव युज्यन्ते सर्व्वशाखिनां ।
मागधीरजनीवोलं सिमायी-खर्जि-पाटला ॥५६॥
एषां चूर्णं वस्त्रपूतमजाक्षीरसमन्वितम् ।
मांसेन शाखिनां देयमेकविंशतिवासरम् ॥५७॥
शिग्रुमूलत्वचश्चूर्णं अर्कक्षीरेण मेलितम् ।
मांसेन देयं सर्व्वेषां शाखिनां दिनसप्तकम् ॥५८॥
पतन्ति तापात् धूमाच्च घातात् पुष्पाणि नेत्रयोः ।
चाङ्गेरीमूलचूर्णेन श्लक्ष्णेनापूरयेद्दृशौ ॥५९॥
मुच्यते पुष्पकैः श्येनस्तथाष्टादशभिर्दिनैः ।
अथवा रजनीनिम्बपत्राणि मरिचानि च ॥६०॥
अभयापिप्पलीमुस्ताविडङ्गैः सममेलितैः ।
अजामूत्रेण वटिकां छायाशुष्कां विधाय च ॥६१॥
पाटले मधुना योज्या पुष्पके स्तन्ययोगतः ।
नाशयत्येव वटिका यथा रुद्रेण निर्म्मिता ॥६२॥

पानभोजनवैषम्यात् पित्तोद्रेकाच्च नेत्रयोः।
शोफः सञ्जायते वर्त्मे तथा पाकश्च दुर्द्धरः ॥६३॥
श्लेष्माधिक्यादपि तथा दुश्चिकित्स्यः प्रजायते।
क्षीरिण्याश्छत्रिकाचूर्णं तिलतैलेन मेलितम् ॥६४॥
पूर्व्वजे मांसमहितं देयं लेपोऽपि शस्यते।
श्लेष्मजे तु शिरे वेध्ये तप्तलौहशलाकया ॥६५॥
मुखपाके नृमूत्रेण मिश्रं मांसं प्रशस्यते।
ततः प्रक्षालनमपि कार्य्यमास्यविशुद्धये ॥६६॥
बन्धकाठिन्ययोगाच्च भयादुत्पतनान्मुहुः।
जायते सव्रणः शोफः पदयोर्गर्द्दभीति सा ॥६७॥
कालातिपातात् पदयोः सैव चांदीति कथ्यते।
पिप्पलीदुम्बरे क्षीरे मेलयित्वा विलेपयेत् ॥६८॥
चरणौ गर्द्दभीशान्त्यै सप्तवासरमन्वहम्।
शान्तिमभ्येति तेषां हि विट्प्रलेपेन वा पुनः ॥६९॥
जलूकां पातयित्वा[१] तु निशासैन्धवसंयुताम्।
नवनीतेन तु खिन्नां लिप्त्वा वस्त्रेण वेष्टयेत् ॥७०॥
दिनत्रयं तदुन्मुच्य पुनरेवं प्रलेपयेत्।
द्वादशाहं प्रलेपेन मुच्यते चांद्यपि स्फुटम् ॥७१॥
आघाताद्धीयमानो यो[२] लक्ष्यते बलवर्णतः।
तस्यौषधमिदं देयं वक्ष्यमाणमतन्द्रिणा ॥७२॥

---

१ C जलौकां पात्यित्वा तु। २ C नो।

द्वे निम्बे तुत्थकं भार्गी मदनं चार्कजं पय: ।
घृते सर्व्वसमासेन मेलयित्वाभिषेणा[१] च ॥७४॥
दातव्यं हि यथा मात्रा त्रिसप्तकदिनावधि ।
क्लिन्नात्पर्य्युषिताच्चैव दुर्जरादामिषाशनात् ॥७४॥
नानाविधा हि क्रमयो दृश्यन्ते तेषु योजयेत् ।
द्विभागेन विड़ङ्गानि कस्तूरीं चैकभागत: ॥७५॥
मेलयित्वा पाययेत युक्त्या तद्रोगशान्तये ।
भयाद्रक्षायिनां गात्रे लिक्षा यूका: पतन्ति च ॥७६॥
तेषां नाशाय मागध्याश्चूर्णेनोद्धूलनं हितम् ।
विल्वमूलत्वचश्चापि पिष्ट्वा गोमूत्रवारिणा ॥७७॥
तल्लेपादेव नश्यन्ति यूका लिक्ष्या न संशय: ॥७८॥

इत्यगदैरुदितैरुपचारै:
संविहितै: सुहितैश्च यथावत् ।
रोगविमुक्ततया परिपुष्टान्
वीक्ष्य ततो विनयेन्मृगयायै ॥७९॥

इति श्रीरुद्रदेवविरचिते श्यैनिके शास्त्रे चिकित्साधिकार-
परिच्छेद: पञ्चम: ।

---

१ A क्षिपेया च।

षष्ठः परिच्छेदः ।

अथैवमगदाद्यैश्च पूर्व्वोक्तैर्बृंहणीयकैः ।
हृष्टान् पुष्टान् समालक्ष्य नूतनच्छदशोभितान् ॥१॥
नीलेन्द्रमणिसङ्काशपक्षतिभ्यां विराजितान् ।
मुक्ताजालैरिवोरस्थपत्रराजिभिरञ्जितान् ॥२॥
निर्मुक्तोरगसङ्काशान् पट्टपाशोपयोजितान् ।
सौविकारत्नपदिकामञ्जरीपिञ्जरीकृतान् ॥३॥
किङ्किणीरावमुखरान् कृत्वा तु सुदिने पुनः ।
पूर्व्वोक्तविधिना रक्तान् विधायाकारयेत् पुनः ॥४॥
पूर्व्वसंस्कारबोधाय रज्जुयन्त्रितपक्षिषु ।
परिपातं शिक्षयीत पक्षरक्षाविशारदः ॥५॥
ये श्येना नीड़निलया लब्धाः प्राग्वन्यपोषिताः ।
ताननभ्यस्तसंस्कारान् पतत्रिपरिपातने ॥६॥
बहुधा शिक्षयेत् प्राज्ञः पाटवक्रमवर्द्धनैः ।
सुशिष्या इव ते श्येनाः शिक्षां गृह्णन्ति सत्वरम् ॥७॥
सम्यक् सुशिक्षितानान्तु श्येनानां मरुतामिव ।
नाकार्य्यं विद्यते किञ्चित् नासाध्यं योग्यवस्तुषु ॥८॥
सञ्चारयेयुस्तान् हस्तैर्युवानो मृष्टकुण्डलाः ।
सुवेशाश्चारुवसनाः शिक्षिता बहुधान्वहम् ॥९॥
शिक्षावैशद्यमालक्ष्य तदैषां स्वयमीश्वरः ।
द्रष्टुं विनोदं निर्गच्छेत् आखेटोदितवासरे ॥१०॥

यामिन्याः प्रथमादेव यामादुद्यमशालिभिः।
प्रातरेव शरन्मेघैर्यायाद्रुद्धे दिवाकरे ॥११॥
दूरसञ्चारितानेकसेनो बह्वान्यसञ्चरः।
स्वयं विरलविख्यातवीराप्तप्रायसंवृतः ॥१२॥
कविकारञ्जुविन्यस्तसमस्तगतिपाटवैः।
मुरजध्वानविन्यासचरणन्यासशालिभिः ॥१३॥
वाह्यमानः स्वयं स्वश्वैः श्येनवाहैश्च संयुतः।
प्रच्छाये भूधरेन्द्राणां यथाकालमतन्द्रितः ॥१४॥
अथवा यामशेषे तु वासरे मृगयामियात्।
शरत्काले पृष्ठतोऽर्कं कृत्वा दूरे तु नो स्थितम् ॥१५॥
उपत्यकायां मृगयां यद्युपेयास्तदाभितः।
प्रचारयेत् पदातींश्च गिरिद्रोण्यन्तरादिषु ॥१६॥
तत्रस्थास्ते च पश्येरन् पक्षिणामपि सर्व्वतः।
उड्डीयान्यच पतनं निलीयानन्तराः स्थलीः ॥१७॥
समायां भुवि विस्तारो मार्गणे सादिनां भवेत्।
विषमायान्तु पत्तीनां गिरिकूटे शुनां पुनः ॥१८॥
मध्ये श्येनधरो नेता पार्श्वयोर्द्वौ च सैनिकौ।
एकविंशत्यश्ववारैर्मण्डलं परिकीर्त्तितम् ॥१९॥
नेदृदन्तेक्षणः सर्व्वो व्याममात्रावकाशतः।
पार्श्वयोः समभागेन मण्डलस्यस्वरेक्षनः ॥२०॥
आपूर्व्वादेश्वरीमाशामधिमोक्तुमथार्हति।
श्यैनिको येन नो लक्ष्यकृतोद्वेगो भवेद्द्वयोः ॥२१॥

श्येना यत्राथ बहवस्तथैव हय-सादिनः ।
सञ्चारयेत् स परितो मण्डलानि पृथक् पृथक् ॥२२॥
